 ISSN: 2349-6002

# वासुदेवविजयाख्यकाव्ये लटः प्रयोगवैविध्यम्

डॉ. योगेश[1], एन् पण्ड्या[2]

[1,2]*सहायकप्राध्यापक, संस्कृतविभाग, (G.E.S. Class-02), सर्वकारीय, कलावाणिज्यमहाविद्यालय, पालिताणा*

*doi.org/10.64643/IJIRTV12I8-191236-459*

***शोधपत्रसार*—आचार्यक्षेमेन्द्राभिमतानुगुणं सारस्वतं वाङ्मयं चतुर्धा विभक्तमस्ति । तद्यथा - शास्त्रम् , काव्यम् , शास्त्रकाव्यम् , काव्यशास्त्रञ्चेति । यस्मिन् काव्ये व्याकरणादिशास्त्राणां व्युत्पत्तिज्ञानमुपतिष्ठापयिषुभिः कविभिः शास्त्रतत्त्वम् अभिनिवेश्यते तत् काव्यशास्त्रमिति व्यपदिश्यते । अस्यां परम्परायां बहुभिः व्याकृत्यलङ्कृतिशास्त्रप्रयोगपारदृश्वभिः कविभिः काव्यशास्त्राणि उपनिबबन्धिरे । तेषु केरलीयविद्वांसः एतद्विधकाव्यप्रणयने शीर्षण्यं स्थानं बिभ्रति । तत्तादृशेष्वन्यतमाः केरलेषु 'पेरुमन ग्रामवास्तव्याः वासुदेवाभिधानिनः कवयः वासुदेवविजयम् इत्याख्यं किञ्चन पाणिनीयव्याकरणोदाहरणसमापनीयं काव्यं प्राणैषुः । काव्यमिदमद्भुतं विद्वद्भोग्यं प्रौढञ्चास्ति । श्रीमद्भागवतपुराणान्तर्गततया दशमस्कन्धस्य श्रीकृष्णबाललीलाः उपजीव्य काव्यमिदं प्राणायि ।**

**यथा सुगलार्थमालायां लकारार्थसूत्राणि सवार्तिकानि पद्यमाध्यमेन उदाजह्रिरे तथा वासुदेवविजयकाव्येऽपि लकारार्थप्रकरणसूत्राणि कृत्स्नानि पद्यैः उदाहृतानि ।**

**लडादीनां दशलकाराणां स्मादिपदसन्निधाने कालान्तरेऽपि प्रयोगवैविध्यमस्ति । अष्टाध्याय्यां तृतीयाध्याये द्वितीयतृतीयतुरीयपादेषु तत्र तत्र लकारार्थाः विभिन्नाः प्रोक्ताः प्रायेण संस्कृतभाषायाः ऐदानीन्तनो वाग्व्यवहारो लडादिदशलकाराणां सामान्यनिर्दिष्टसन्दर्भेष्वेव परिसीमितो वरीवर्ति । तेषु दशलकारेषु लटो वर्तमानातिरिक्तेषु कालेषु सन्दर्भेषु च प्रयोगो भवति । परन्तु काव्योदाहरणानि विना तेषां प्रयोगाणां ज्ञानं दुर्घटम् । अतोऽनुसन्धाता शोधपत्रेऽस्मिन् वासुदेवविजयकाव्यम् आलम्ब्य लटः प्रयोगवैविध्यं प्रतुष्टूषति ।**

## I. प्रास्ताविकम्

सकलप्रयोजनमौलिभूतं रसास्वादनसमुद्भूतं विगलितवेद्यान्तरम् आनन्दम् इत्यादिमम्मटभट्टोक्तरीत्या काव्यरसस्यास्वादनं काव्यस्य प्रमुखं प्रयोजनं वरीवर्तीति विज्ञायते । किन्तु एतदतिरिच्य व्याकरणादिशास्त्रज्ञानमपि काव्यरचनायै प्रयोजनं भवति । यत्काव्यं शास्त्रज्ञानं जनयति तत्काव्यशास्त्रमिति नाम्ना व्यपदिश्यते । एतदुक्तं भोजराजेन -

[1]'यत्रार्थः शास्त्राणां काव्ये निवेश्यते महाकविभिः ।
तद्भट्टिकाव्यमुद्राराक्षसवत् काव्यशास्त्रं स्यात् ।।

औचित्यसम्प्रदायप्रवर्तकः आचार्यक्षेमेन्द्रोऽपि स्वीये सुवृत्ततिलकाख्यग्रन्थे सकलं सारस्वतं वाङ्मयं चतुर्विधं निर्ब्रूते । तद्यथा -

[2]शास्त्रं काव्यं शास्त्रकाव्यं काव्यशास्त्रं च भेदतः ।
चतुष्प्रकारः प्रसरः सतां सारस्वतो मतः ।।

किञ्च तत्रैव किन्नाम काव्यशास्त्रम् ? इत्यपि उच्यते -

[3]भट्टिभौमककाव्यादि काव्यशास्त्रं प्रचक्षते ।।

अर्थात् यत्र काव्ये व्याकरणादीनि शास्त्राणि पद्योदाहरणमुखेन प्रतिपाद्यन्ते तत्काव्यशास्त्रमित्युच्यते । व्याकरणादिशास्त्रेषु पारदृश्वानो विद्वांसः काव्यरचनामुखेन तत्तच्छास्त्राणां सरसतया तत्त्वाधिगमाय शास्त्रप्रधानानि काव्यानि प्राणेषुः । तत्र विशिष्य व्याकरणशास्त्रे, अष्टाध्यायीमवलब्य

 © IJIRT | www.ijirt.org JANUARY 2026 

 ISSN: 2349-6002

ततच्चरित्रम् उपजीव्य बहवो विद्वांसः काव्यशास्त्राणि रचयामासुः ।
तत्र केरलेषु इयं काव्यशास्त्रप्रवचनपरम्परा विशेषेण पल्लविता पुष्पिता फलिता च दरीदृश्यते । वासुदेवविजयम् इति काव्यशास्त्रमपि तस्य एव परम्परावृक्षस्य व्याकरणशास्त्रसौरभयुतं किमप्यद्भुतं भगवच्चरितोपबृंहितं व्याकृतिव्युत्पत्तिम् आधित्सूनां शास्त्रव्यसनिनां कृते मनोज्ञं काव्यपुष्पम् इत्यस्माभिरनुबोभूयते । किन्तु गच्छताऽनेहसा काव्यशास्त्रम् इति पदम् आलङ्कारिकशास्त्रीय-लक्षणग्रन्थपरिचायकं बभूव । अतः अस्यां सन्देहदशायां सत्यां स्पष्टप्रतिपत्त्यर्थं कैश्चिद् विद्वद्भिः एतद्विधकाव्यरचनायै उदाहरणकाव्यम् इति शब्दः प्रायुज्यत ।
व्याकरणशास्त्रस्य उदाहरणपरकानां काव्यानां कृते उदाहरणकाव्यम् इति पदप्रयोगः सर्वादौ चतुर्दशशताब्द्यां समुद्भूतेन अमृतानन्दयोगिना स्वीये अलङ्कारसङ्ग्रहाख्यग्रन्थे अकारि ।

[4]'उदाहरणकाव्यत्वात् न दुष्टं श्रुतिकट्वपि । ।
(अलङ्कारसङ्ग्रहः 6-82)

चतुर्दशशताब्द्याः एव महट्टीकाकृता मल्लिनाथेनाऽपि एतद्विधकाव्यपरम्परायै उदाहरणकाव्यम् इति व्यपदेशः व्यधायि । भट्टिकाव्यस्य टीकाऽरम्भे स ब्रवीतीत्थम् -

॥. [5]'रामकथामाश्रित्य पाणिनीयसूत्राणाम् उदाहरणकाव्यं चिकीर्षुराशीद्यन्यतमस्य

वासुदेवविजयस्य तत्प्रणेतुश्च परिचितिः - वासुदेवविजयाभिधं व्याकरणोदाहरणसमापनीयं काव्यमिदं सर्गाणां सप्तके उपनिबद्धम् अद्भुतं प्रौढं सुधियाम् उत्सवायमानं कमपि क्रमं प्रौढिमानं प्रथयतितमाम् । अत्र कविना पाणिनीयाष्टकानुशासनानां केवलेषु 657 श्लोकेष्वेव उदाहरणानि सलिलं हृदयङ्गमतया प्रादर्शिषत ।
काव्येऽस्मिन् संज्ञास्वरप्रकरणेऽतिरिच्य कृत्स्नानि पाणिनीयानुशासनानि शब्दशास्त्रस्य लाघवपक्षस्य समर्थनपुरस्सरम् उदाजह्रिरे । प्रायेणान्योदाहरणकाव्यानि विशालकलेवराणि भवन्ति । परन्त्विदं लघुकाव्यं सदपि विपुलोदाहरणराशिं वितनोतितराम् । कविकुलभूषणः नारायणभट्टः तु नैजे धातुकाव्यारम्भे सप्रश्रयं वासुदेवकविं सरीस्मर्ति । तदित्थम् -

[6]उदाहृतं पाणिनिसूत्रमण्डलं प्राग्वासुदेवेन तदूर्ध्वतोऽपरः ।
उदाहरत्यद्य वृकोदरोदितान् धातून् क्रमेणैव हि माधवाश्रयात् । ।
(धातुकाव्यम् - 1.1.)

सर्गसप्तकोपनिबद्धेऽस्मिन् काव्ये भगवतः श्रीकृष्णस्य जन्मनः आरभ्य केशिवधपर्यन्ताः कथाः निरवर्ण्यन्त । अस्य काव्यस्योपजीव्यत्वेन भागवतपुराणस्य दशमस्कन्धान्तर्गता सप्तत्रिंशदध्यायपर्यन्ता कथा भवति । वासुदेवकविः - अनेकविद्वदाचार्याकरायमाणेषु केरलदेशेषु पेरुमनग्रामे लब्धजनुषः व्याकृत्यलङ्कृतिशास्त्रपारदृश्वानः पण्डितमचर्चिकाः अनितरसाधारणपाण्डितीमन्तः वासुदेवकवयः वासुदेवविजयकाव्यस्य प्रणेतृपदमध्यासते ।
वस्तुतः काव्योदाहरणप्रणयनपरम्परायां केरलीयविद्वांसः शीर्षण्यं स्थानं बिभ्रति । तेष्वन्यतमाः इमे वासुदेवकवितल्लजाः जेगीयन्ते । किञ्च शास्त्रकाव्यानि वा उदाहरणकाव्यानि व्याख्यागम्यान्येव भवन्ति भट्टीद्युक्तरीत्या । अतस्तां सरणीमनुसृत्य कविरयं स्वयमेव पदचन्द्रिका नाम्नीं टीकां विलिलेख । धातुकाव्यं वस्तुतः वासुदेवविजयस्य अग्रगामि काव्यमेवास्ति ।
लट्लकारप्रयोगवैविध्यम् अष्टाध्याय्यां तृतीयाध्ययस्य द्वितीयतृतीयतुरीयपादेषु तत्र तत्र लकारार्थाः

प्रोक्तास्सन्ति । प्रायेण बहूनामिदं भान्तिविलसितं चिन्तितं भवति यत् लडादयो लकाराः केवलेषु वर्तमानादिसामान्यनिर्दिष्टसन्दर्भेष्वेव प्रयुज्यन्ते । किन्तु लकारार्थसूत्राभ्यसनेनेदं स्पष्टं भवति यत् लडादीनां सामान्यप्रसङ्गान् अतिरिच्याऽपि स्मादिशब्दसन्निधाने कालान्तरेऽपि प्रयोगाः भवन्त्येव । सोऽयं विषयः लकारार्थप्रकरणे कौमुदीकाशिकादौ सोदाहरणं प्रतिपादितः । एतादृशप्रयोगस्तु काव्येष्वपि विरलतया प्राप्यते । का कथा पुनः ऐदंयुगीनसंस्कृतवाग्व्यवहारस्य ?

लड्विधायकसूत्राणि - लकारार्थप्रकरणे तु लडादीनां दशलकाराणां सूत्रसङ्ख्या (70) सप्ततिरस्ति । तत्र आद्यः लट्लकारः तस्य लटः विधायकसूत्राणि अत्र प्रस्तूयन्ते ।

1) [7]लट् स्मे (पा.सू. 3.2.118)
2) [8]अपरोक्षे च (पा.सू. 3.2.119)
3) [9]ननौ पृष्टप्रतिवचने (पा.सू. 3.2.120)
4) [10]नन्वोः विभाषा (पा.सू. 3.2.121)
5) [11]पुरि लुङ् चास्मे (पा.सू. 3.2.122)
6) [12]यावत्पुरानिपातयोर्लट् (पा.सू. 3.3.4)
7) [13]विभाषा कदाकर्योः (पा.सू. 3.3.5)
8) [14]किंवृत्ते लिप्सायाम् (पा.सू. 3.3.6)
9) [15]लिप्स्यमानसिद्धौ च (पा.सू. 3.3.7)
10) [16]लोडर्थलक्षणे च (पा.सू. 3.3.8)
11) [17]वर्तमानसामीप्ये वर्तमानवद्वा (पा.सू. 3.3.131)
12) [18]आशंसायां भूतवच्च (पा.सू. 3.3.132)
13) [19]गर्हायां लडपिजात्वोः (पा.सू. 3.3.142)
14) [20]धातुसम्बन्धे प्रत्ययाः (पा.सू. 3.4.1)
15) [21]समुच्चये सामान्यवचनस्य (पा.सू. 3.4.5)

यत्, ह, शश्वत्, स्म, ननु, न, नु, पुरा, यावत्, कदा, कर्हि, अपि, जातु, कथं, किङ् किल, यच्च, यत्र, स्म इत्येतेषाम् अव्ययानां समभिव्याहारे लडादीनां लकाराणां कालान्तरेऽपि प्रयोगसाधुत्वमस्ति । अधुना प्रत्येकमपि लट्लकारविधायकसूत्राणां वासुदेवविजयाख्यकाव्यस्य उदाहरणैः परिशीलनं विदध्याम ।

1. लट् स्मे (पा.सू. 3.1.118) इत्याद्यं लड्विधायकसूत्रम् । सिद्धान्तकौमुद्यां तस्य वृत्त्युदाहरणे दर्शिते यथा [22]लटोऽपवादः । यजति स्म युधिष्ठिरः । काशिकायां तु स्पष्टार्थः निरदिश्यत- [23]भूतानद्यनपरोक्षे इति वर्तते । स्म-शब्दे उपपदे भूतानद्रद्यनपरोक्षे लट्प्रत्ययो भवति । परोक्षे लट् (पा.सू. 3.2.115) इति सूत्रेणाऽत्र लिटः प्रप्तिः भवति भूतानद्यतनपरोक्षे वक्तव्ये । तथाऽप्यत्राऽनेन सूत्रेण स्मेत्यव्यवसाहचर्ये लड्विधानमस्ति । एतदुदाहरणं वासुदेवविजये चतुर्थसर्गे-

III. [24]किमसौदिति सुस्त्रियो भुजिष्या

प्रति काल्ये बहुधा कृतानुयोगाः ।
उपयन्ति गृहं व्रजस्त्रियः स्म
ज्वलनद्वैपमणीविभूषणास्तत् । । (4.3)

व्रजस्त्रियः प्रातःकाले तद्गृहम् उपयन्ति स्म अर्थात् प्राप्ताः । असौ यशोदा किमपत्यं प्रसूतवती इति परिचारिकाः सुस्त्रियः प्रति ज्वलनशीलसुमद्रसमीप-व्यतिरिक्तवीपालङ्काराः ताः स्त्रियः यशोदागृहम् उपयन्ति स्म भूतकालद्द्योतकाव्ययसाहचर्थे लट् स्मे (पा.सू. 3.1.118) इति सूत्रेण भूतानद्रद्यतनपरोक्षे लट्लकारप्रयोगोऽस्ति ।

2. अपरोक्षे च (पा.सू. 3.1.119) [25]भूतानद्यतने लट् स्यात् स्म योगे । काशिकायां तु [26]अपरोक्षे च भूतानद्रद्यतनेऽर्थे वर्तमानाद् धातोः स्मे उपपदे लट्प्रत्ययो भवति । अर्थात् भूतमात्रे अनद्रद्यतनपरोक्षभूते च स्म-योगे लट्लकारप्रयोगः भवति ।
वासुदेवविजये एतदुदाहरणं चतुर्थसर्गे यथा –

[27]ऋषयोऽभ्यवपद्यते स्म दैवं

बत वर्षाभ्वमिवाम्बुदो न एवम् ।
परिपात सदेति सोऽखिलप्वः
कथयंस्तान् सुधियोऽर्चति स्म नन्दः । । (4.5)

एतस्याऽयं भावः यत् नन्दः कथयति हे ऋषयः ! अस्मदीयभाग्यम् इत्थम् अन्वगृहीत् यथा मेघाः स्ववर्षाभिः मण्डूकम् अनुगृह्णन्ति । हे सुधियः ! अखिलप्वः ! यूयं सदाऽस्मान् रक्षत इति कथयन् नन्दः तान् ऋषीन् अर्चति स्म । अत्राऽपि स्म इत्यव्यययोगे अपरोक्षे च ( पा.सू. 3.1.119) इति सूत्रेण लट्लकारप्रयोगः दृश्यते ।

3. ननौ पृष्टप्रतिवचने (पा.सू. 3.2.120) सिद्धान्तकौमुद्यर्थस्तु - [28]अनद्यतनपरोक्ष इति निवृत्तम् । भूते लट् स्यात् । काशिकाऽर्थस्तु - [29]ननु शब्दे उपपदे प्रश्नपूर्वके प्रतिवचने भूतेऽर्थे लट्प्रत्ययो भवति । भूतसामान्येऽर्थे सूत्रेणाऽनेन लुङ्लकारं बाधित्वा लट्प्रयोगो भवति ।

एतत्सूत्रोदाहरणं वासुदेवविजये चतुर्थसर्गे यथा -

[30]किमदा धनमर्थिने समस्मा इति पृष्टः स्वजनोऽ
मुनोन्मनीसन् ।
सकलोऽपि ददामि नन्विति द्राङ् न ददामीति तु नो
पुरान्यगादीत् । ।

एतस्यायम्भावः यत् जातस्य बालकृष्णस्य जातकर्म कर्तुं समुद्रद्यतः पिता नन्दः अपृच्छत् त्वं सर्वस्मै अपि अर्थिने धनं किं दत्तवान् ? इत्थम् उत्कण्ठितचित्तेनामुना नन्देन पृष्टः सकलोऽपि स्वजनवर्गः पृष्टप्रतिवचनत्वेन 'ददामि ननु' अर्थात् दत्तवान् एव इति शीघ्रं प्रत्युत्तरितवान् ।

अत्र श्लोके ननु शब्दोपपदे नन्देन पृष्टस्य प्रश्नस्य प्रतिवचने वक्तव्ये ननौ पृष्टप्रतिवचने (पा. सू. 3.2.120) इति सूत्रेण ददामि इति भूतसामान्ये लट्प्रयोगोऽस्ति ।

4. नन्वोर्विभाषा (पा.सू. 3.2.121) सिद्धान्तकौमुद्रद्यर्थः - [31]नशब्दे नुशब्दे च लट् वा स्यात् ।

काशिकाऽर्थः – [32]नशब्दे नुशब्दे च उपपदे पृष्टप्रतिवचने विभाषा लट्प्रत्ययो भवति भूते । अर्थात् न एवं नु इत्यव्ययप्रयोगे भूतार्थवृत्तेः धातोः विकल्पेन लट्लकारो विधीयते । किन्तु अत्रापि पृष्टस्य प्रतिवचनसन्दर्भे लडयं भूते विभाषा विधीयते । एतदुदाहरणं वासुदेवविजयस्य चतुर्थसर्गस्य पूर्वोक्तपद्यमेवास्ति । तत्र [33]न ददामीति तु नो पुरा न्यगादीत् इत्यत्र न इत्यव्यययोगे नन्वोर्विभाषा (पा.सू. 3.2.121.) इत्येन ददामि इत्यत्र भूतेऽर्थे लट् प्रयोगः ।

5. पुरि लुङ् चास्मे (पा.सू. 3.2.122) सिद्धान्तकौमुद्यर्थः - [34]पुराशब्दयोगे भूताऽनद्यतने विभाषा लुङ्, चाल्लट्, न तु स्मयोगे ।

काशिकाऽर्थस्तु - [35]पुराशब्दे उपपदे स्मशब्दवर्जिते भूताऽनद्यतनेऽर्थे विभाषा लुङ्प्रत्ययो भवति, लट् च । अर्थात् अनेन सूत्रेण पुरा-शब्दयोगे भूतकाले वक्तव्ये लुङभावे लट्लकारः भवति ।

एतदुदाहरणं वासुदेवविजये तृतीयसर्गस्य तृतीयपद्यमस्ति तद्यथा -

[36]येषां पराजेषत वीर्यभूम्न
येभ्यः पुरान्तर्दधते च पूर्वम् ।
मुष्टिन्धयेभ्योऽपि च दानवेभ्यः
तेभ्यस्तदा नाबिभयुर्दिविष्ठाः । । (3.2)

अत्र श्लोकस्याऽयं भावः यत् भगवति नारायणे जनिष्यमाणे नक्षत्रपथात् देवैः मुक्तानि स्वर्गवृक्षकुसुमानि पेतुः । तस्मिन् काले ते देवाः दानवेभ्यः न भीतिमवापुः । ये देवाः पूर्वं दानवानां वीर्यभूम्नः विमुखीबभूवुः, ये देवाः पुरा अत्यन्तं बालेभ्योऽपि येभ्यः दानवेभ्यः लुप्ताः अभूवन्, ते देवाः न बिभ्यति स्म इति भावः । अत्र पुरान्तर्दधते इत्यत्र पुरा इत्याकारान्ताऽव्यये उपपदे भूताऽनद्यतनेऽर्थे अन्तर्दधते इति लट्प्रयोगो नेत्रपथिकायते ।

6. यावत्पुरानिपातयोर्लट् (पा.सू. 3.3.4) कौमुद्यर्थः - [37]निपातोवेतौ निश्चयं द्योतयतः ।
काशिकाऽर्थस्तु - [38]भविष्यति इत्येव । यावत्पुराशब्दयोः निपातयोः उपपदयोः भविष्यति काले धातोर्लट्प्रत्ययः भवति । इत्थञ्च यावत् पुरा इत्येतयोः निश्चयार्थद्योतकयोः अव्यययोः योगे भविष्यत्काले धातोः लट्लकारो विधीयते । लृटः लुटश्चापवादतया अनेन सूत्रेण लट्लकारः विधीयते ।
एतदुदाहरणं वासुदेवविजये पञ्चमसर्गे इत्थमस्ति-
[39]विन्दे कदातिसुखितामिति मा तनिष्ठाः
चिन्तां समास्तरसि ते तनयेन यावत् ।
गौपुच्छिकेन घटिकाश्च यथाम्बु नाव्यं
गोपुच्छकेन च घटेन च भो ! विपत्तीः ।। (5.5)
श्लोकेऽस्मिन् भगवन्नामकरणसंस्कारसम्पादनायागतः दैवज्ञः गर्गः नन्दमित्थं प्रणिगदति यद् भो नन्द ! अहं कदा अत्यन्तसुखयुक्तत्वं प्राप्नोमि इति चिन्तां मा कृथाः । तव तनयेन कृष्णेन सर्वाः आपदः यावत् तरसि अर्थात् निश्चयेन तरिष्यसि । यथा नाव्यम् अम्बु गोपुच्छकेन घटेन च तरतः, तथा त्वं विपत्तीः तरसीति भावः ।
अत्र श्लोके यावत् इति निश्चयार्थद्योतके अव्यये उपपदे भविष्यत्काले यावत्पुरानिपातयोर्लट् (पा.सू. 3.3.4) इति सूत्रेण तृ-प्लवनसन्तरणयोः इति धातोः लटि तरसि इति रूपं साधु । त्वं यावत्तरसि अर्थात् निश्चयेन त्वम् आपदः तरिष्यसि ।

7. विभाषा कदाकर्ह्योः (पा.सू. 3.3.5) - कौमुद्यर्थः - [40]भविष्यति लड्वा स्यात् ।
काशिकाऽर्थस्तु - [41]कदा, कर्हि इत्येतयोः उपपदयोः विभाषा भविष्यति काले धातोः लट्प्रत्ययो भवति । अनेन सूत्रेण विकल्पेन लड्विधानं भवति । एतत्सूत्रसन्दर्भे पूर्वोक्तमेव पद्यं वासुदेवविजये उदाजह्रे ।
[42]विन्दे कदातिसुखितामिति मा तनिष्ठाः इत्यत्र कदा इत्यव्यये उपपदे प्रकृतसूत्रेण विकल्पेन भविष्यकाले विन्दे इति लटि प्रयोगः दृश्यते ।

8. लिप्स्यमानसिद्धौ च (पा. सू. 3.3.7) कौमुद्यर्थः - [43]लिप्स्यमानेन अन्नादिना स्वर्गादेः सिद्धौ गम्यमानायां भविष्यति लड्वा स्यात् । काशिकाऽर्थस्तु [44]विभाषा इत्येव । लिप्स्यमानात् सिद्धिः लिप्स्यमानसिद्धिः । लिप्स्यमानसिद्धौ गम्यमानायां भविष्यति काले धातोः विभाषा लट्प्रत्ययो भवति । लब्धुम् इष्यमाणेन अन्नादिना स्वर्गलोकादिप्राप्तौ गम्यमानायां भविष्यकाले विकल्पेन धातोः लट्लकारः क्रियतेऽनेन सूत्रेण ।
एतदुदाहरणं वासुदेवविजयस्य पञ्चमसर्गे इत्थमस्ति -
[45]को दास्यते ये शमयन्ति तेऽदः
कौशत्थमन्नमितरच्च वदत्सु वर्षैः ।
भिक्षाद्वितीयमपि चेह तुरीयभिक्षां
द्राग् दारवो हि दमिनो न विशेरतेऽर्थे ।। (5.6)
अत्र श्लोके ददाति, अयन्ति इत्यत्र कौलत्थान्नादिना सुखेप्सायाः गम्यमानत्वात् प्रकृतसूत्रेण लट्लकारः व्यधायि ।

9. लोडर्थलक्षणे च (पा. सू. 3.3.8) - कौमुद्यर्थः - [46]लोडर्थः प्रैषादिर्लक्ष्यते येन तस्मिन्नर्थे वर्तमानाद्धातोः भविष्यति लड् वा स्यात् । काशिकाऽर्थस्तु - [47]लोडर्थः प्रैषादिर्लक्ष्यते येन सः लोडर्थलक्षणो धात्वर्थः , तत्र वर्तमानाद्धातोः भविष्यति काले विभाषा लट्प्रत्ययो भवति ।
विधिनिमन्त्रणाऽमन्त्रणाऽधीष्टसम्प्रश्नप्रार्थनाः लोडर्थाः सन्ति । अतः यस्माद्धातोः लोडर्थः परिलक्ष्यते तस्मिन् अर्थे विद्यमानाद्धातोः भविष्यति काले विकल्पेन लट्लकारः प्रकृतसूत्रेण विधीयते ।
एतदुदाहरणं वासुदेवविजये पञ्चमसर्गेऽस्ति -
[48]याचन्ति नो यदि ददाम तदेति सन्तः

संविद्रते न सुकृताकषिका वदान्याः ।
स्तन्यं कुमारक इवाशु दशाहजातः
पुण्यस्य यस्य परिपाकसुधां प्रधातुम् । । (5.7)

श्लोकाऽर्थः एवमस्ति यत् अस्मान् केचन यदि याचन्ति तर्हि यच्छाम इति पुण्यार्जनोत्सुकाः जनाः न वदन्ति । अर्थात् ते सर्वदा पुण्यार्जनरताः श्रेष्ठाः लोकाः यत्किञ्चिद्दित्सन्ते । यथा दशदिनोत्पन्नः शिशुः स्तन्यं दुग्धं प्रकर्षेण पातुम् उत्सहते । तथैव हे नन्द ! त्वमपि पुत्रजन्मोत्सवाङ्गत्वेन सर्वेभ्यः दानं विधाय पुण्यार्जनामृतपानाय यतस्व इति भावः ।

श्लोकेऽस्मिन् याचन्ति इत्यत्र याच् धातोः विधिः इति लोडर्थः परिलक्ष्यते इत्यतः लोडर्थलक्षणे च (पा. सू. 3.3.8) इति सूत्रेण भविष्यति काले लट्लकारः विहितः ।

10. वर्तमानसामीप्ये वर्तमानवद्वा (पा. सू. 3.3.131) - कौमुद्यर्थः - [49]वर्तमाने लट् इत्यारभ्य उणादयो बहुलम् इति यावत् येनोपाधिना प्रत्ययाः उक्ताः ते तथैव वर्तमानसमीपे भूते भविष्यति च वा स्युः ।

काशिकाऽर्थः – [50]वर्तमानसमीपे भूते भविष्यति च वर्तमानाद् धातोः वर्तमानवत् प्रत्ययाः वा भवन्ति । वर्तमाने लट् (पा. सू. 3.2.123) इत्यतः आरभ्य उणादयो बहुलम् (पा. सू. 3.3.1) इति यावत् ये प्रत्ययाः वर्तमाने उक्ताः ते प्रत्ययाः भूतकाले भविष्यत्काले च भवन्तीति सूत्रार्थः ।

एतत्सूत्रोदाहरणं वासुदेवविजयस्य षष्ठसर्गेऽस्ति -
[51]गच्छामो मिङ्क्ष्वितो देशान्नेदीयस्तालकानम् ।
स्वापैः तालफलैस्त्वं नः क्षुधामाकालिकीं कुरु । । (6.16)

बालकृष्णः स्वमित्रैस्सह गोचारणाय वनं जगाम । तत्र क्रीडापरिश्रान्तः क्षुत्पीडितः कश्चित्कृष्णसखा इत्थमब्रवीत् - हे नाथ ! अस्माद्देशात् क्षिप्रमेव अत्यन्तसमीपे तालकाननं वयं यास्यामः । त्वं श्रीकृष्णः सुलभैः तालफलैः अस्माकं बुभुक्षां दृष्टनष्टां विधेहीत्यर्थः ।

श्लोकेऽस्मिन् गच्छामः इत्यत्र समीपवर्तिभविष्यत्कालं वक्तुं वर्तमानसामीप्ये वर्तमानवद्वा (पा. सू. 3.3.131) इति सूत्रेण गम् धातोः लट् लकारो विहितः ।

11. गर्हायां लडपिजात्वोः (पा. सू. 3.3.140) - कौमुद्यर्थः - [52]आभ्यां योगे लट् स्यात् कालत्रये गर्हायाम् । काशिकाऽर्थः - [53]गर्हायां गम्यमानायाम् अपिजात्वोः उपपदयोः धातोः लट्प्रत्ययो भवति।

गर्हा नाम निन्देत्यर्थः । अतः निन्दायां गम्यमानायाम् अपि इत्यव्यययोगे वा जातु इत्यव्यययोगे भूते भविष्यति वर्तमाने च काले अनेन सूत्रेण लट्लकारो विधीयते ।

एतदुहारणं वासुदेवविजयस्य षष्ठसर्गेऽस्ति ।
तद्यथा -
[54]कथं नाम विदध्यास्त्वं गर्हणीय गवां वधम् ।
अपि प्सासि पलं तासां को नामाघे सदारमेत् । । ( )

श्लोकाऽर्थः इत्थमस्ति - श्रीकृष्णः बलरामश्च स्वमित्रैस्सह क्षुन्निवारणाय तालकाननं जग्मुः । परन्तु तत्र खराकृतिः धेनुकासुरः न्यवसत् । तद्भयेन बालगोपसखायः पलायिताः । परन्तु बलरामः तालवृक्षं भुजाभ्यां कम्पयन् फलसमूहं पातयामास । तदा वृक्षकम्पनध्वनिना क्रुद्धः धेनुकासुरस्तत्राऽजगाम । धेनुकासुरमुद्दिश्य वदति बलरामः रे निन्दनीय ! त्वं कथन्नाम धेनूनां वधं कुर्याः । अपि च त्वं तासां गवां मांसमपि भक्षयसि । गौस्तु अवध्याऽस्ति । अपि च वयं त्वां धिक्कुर्महे यत्त्वं सदा पापाचरणे रतिं करोषि ।

श्लोकेऽस्मिन् प्सासि इत्यत्र प्सा भक्षणे इति धातोः अपि इत्यव्यययोगे गोवधात्मकनिन्दायां गम्यमानायां गर्हायां लडपिजात्वोः (पा. सू. 3.3.142) इति सूत्रेण लट्लकारो विहितः ।

## IV. उपसंहार

शोधपत्रेऽस्मिन् लकारार्थप्रकरणान्तर्गतसूत्रेषु यानि लट्लकारविधायकसूत्राणि सन्ति, तानि

 ISSN: 2349-6002

वासुदेवविजयकाव्यस्य पद्यानां माध्यमेन उदाजह्रिरे । तथापि किंवृत्ते लिप्सायाम् (पा. सू. 3.3.6) , आशंसायां भूतवच्च (पा. सू. 3.3.132) ,विभाषा कथमि लिङ् च (पा. सू. 3.3.143), इच्छार्थेभ्यो विभाषा वर्तमाने (पा. सू. 3.3.16.) , धातुसम्बन्धे प्रत्ययाः (पा. सू. 3.4.1) , समुच्चये सामान्यवचनस्य (पा. सू. 3.4.5) इत्येभिः सूत्रैरपि पाक्षिकं लट्लकारविधानं कालान्तरे भवत्येव । परन्तु एतैस्सूत्रैः लड्विधानस्य गौणत्वात्, अन्येषां लकाराणां विधानस्य प्रबलत्वाच्च पूर्वोक्तानां सूत्राणां लट्लकारगतान्युदाहरणानि वासुदेवविजये नोपलभ्यन्ते इत्यतस्तानि सूत्राणि अत्र नोपनिबद्धानि । वस्तुतः वासुदेवविजयं पाणिनीयाष्टकस्य उदाहरणभूतं विलक्षणं काव्यं सर्वेणाऽपि शाब्दिकेन सूत्रार्थानां सुगमावबोधाय अवश्यमेवाभ्यसनीयम् । वासुदेवविजयस्याऽध्ययनेन निश्चप्रचं वयं लट्लकारस्य प्रयोगवैविध्यम् अभिज्ञाय आस्माकीनवाग्व्यवहारेऽपि प्रयोक्तुमर्हामः । वासुदेवविजयाऽऽख्यं व्याकरणोदाहरणकाव्यम् , तत्प्रणेता शब्दकोविदः वासुदेवकविश्च नितरां श्लाघनीयतां भजेते ।

## सन्दर्भ


[1] भोजराजकृतः शृङ्गारप्रकाशः 11-343

[2] क्षेमेन्द्रकृतं सुवृत्ततिकलम् -3-2

[3] क्षेमेन्द्रकृतं सुवृत्ततिकलम् - 3-4

[4] अलङ्कारसंग्रहः 6-82

[5] उत्सवः सुधियामलम् - व्याकरणोदाहरणकाव्येषु वासुदेवविजयम् शोधलेखः -पु.97

[6] काव्यमाला -धातुकाव्यम् -पु.121

[7] अष्टाध्यायी शोधपत्रेऽस्मिन् संपूर्णे दीक्षितपुष्पासम्पादितः अष्टाध्यायीसूत्रपाठः उपयुक्तः ।

[8] अष्टाध्यायी

[9] अष्टाध्यायी

[10] अष्टाध्यायी

[11] अष्टाध्यायी

[12] अष्टाध्यायी

[13] अष्टाध्यायी

[14] अष्टाध्यायी

[15] अष्टाध्यायी

[16] अष्टाध्यायी

[17] अष्टाध्यायी

[18] अष्टाध्यायी

[19] अष्टाध्यायी

[20] अष्टाध्यायी

[21] अष्टाध्यायी

[22] वै.सि.कौ. श्रीधरमुखोल्लासिनी हिन्दीव्याख्यासमन्विता - व्याख्याकारः श्रीगोविन्दाचार्यः ।

[23] काशिका -2 (तृतीयचतुर्थाध्यायौ) प्रधानसम्पादकः आचार्यराधावल्लभत्रिपाठी कुलपतिः रा.सं.सं. (शोधपत्रेऽस्मिन् सर्वत्र इयमेवाऽऽवृत्तिः उपयुक्ता ) ।

[24] शोधपत्रेऽस्मिन् संपूर्णे विजयपालशास्त्रिसम्पादितं रा.सं.सं. वेदव्यासपरिसरेण प्रकाशितं वासुदेवकविविरचितं वासुदेवविजयम् उपयुक्तम् ।

[25] वै.सि.कौ.

[26] काशिका -2

[27] वासुदेवविजयम् ।

[28] वै.सि.कौ. ।

[29] काशिका-21

[30] वासुदेवविजयम् ।

[31] वै.सि.कौ. ।

[32] काशिका-2 1

[33] वासुदेवविजयम् ।

[34] वै.सि.कौ. ।

[35] काशिका-21

[36] वासुदेवविजयम् ।

[37] वै.सि.कौ. ।

[38] काशिका-21

ISSN: 2349-6002

[39] वासुदेवविजयम् ।
[40] वै.सि.कौ. ।
[41] काशिका-2 |
[42] वासुदेवविजयम् ।
[43] वै.सि.कौ. ।
[44] काशिका-21
[45] वासुदेवविजयम् ।
[46] वै.सि.कौ. ।
[47] काशिका-2 1
[48] वासुदेवविजयम् ।
[49] वै.सि.कौ ।
[50] काशिका -21
[51] वासुदेवविजयम् ।
[52] वै.सि.कौ ।
[53] काशिका-2 ।
[54] वासुदेवविजयम् ।

## सन्दर्भग्रन्थसूची


[1] भोजराजकृतः शृङ्गारप्रकाशः 11-343
[2] क्षेमेन्द्रकृतं सुवृत्ततिकलम् -3,2 3-4
[3] अलङ्कारसङ्ग्रहः 6-82
[4] उत्सवः सुधियामलम् - व्याकरणोदाहरणकाव्येषु वासुदेवविजयम् शोधलेखः प्रकाशनम् - कालिकट्ट विश्वविद्यालयः ।
[5] व्यमाला -धातुकाव्यम् चौखम्भाभारती अकादमी ।
[6] अष्टाध्यायी - शोधपत्रेऽस्मिन् सम्पूर्णे दीक्षितपुष्पासम्पादितः अष्टाध्यायीसूत्रपाठः उपयुक्तः । प्रकाशनम् - ज्ञानभारती पब्लिकेशन दिल्ही ।
[7] विजयपालशास्त्रिसम्पादितम् रा.सं.सं. वेदव्यासपरिसरेण प्रकाशितं वासुदेवकविविरचितं वासुदेवविजयम् ।
[8] वैयाकरणसिद्धान्तकौमुदी - (णिजन्तप्रकरण से लकारार्थप्रकिया तक) श्रीधरमुखोल्लासिनी हिन्दीव्याख्यासमन्विता - व्याख्याकारः श्रीगोविन्दाचार्यः। प्रकाशनम् - चौखम्भा सुरभारती प्रकाशनम् ।
[9] काशिका -2 (तृतीयचतुर्थाध्यायौ) प्रधानसम्पादकः आचार्यराधावल्लभत्रिपाठी-कुलपतिः राष्ट्रिय संस्कृत संस्थानम् - नवदेहली ।